# २८. पादुका सहस्रम् - सुभाषित पद्धतिः (१०)

कलासु काष्ठा मातिष्ठन् भूम्ने सम्बन्धिनामपि ।
पादुका रङ्गधुर्यस्य भरताराध्यतां गता ॥ २८.१॥ ८२१॥

सन्तः स्वदेश परदेश विभाग शून्यं
हन्त स्ववृत्ति मनघां न परित्यजन्ति ।
राज्ये वने च रघुपुङ्गव पादरक्षा
नैजं जहौ न खलु कण्टक शोधनं तत् ॥ २८.२॥ ८२२॥

ब्रह्मास्त्रता मधिजगाम तृणं प्रयुक्तं
पुण्यं शरव्य मभवत्पयसां निधिर्वा ।
पृथ्वीं शशास परिमुक्त पदं पदत्रम्
किं वा न किं भवति केलिविधौ विभूनां ॥ २८.३॥ ८२३॥

अन्येषु सत्स्वपि नरेन्द्रसुतेषु दैवात्
भ्रष्टः पदा दधिकरोति पदं पदार्हः ।
प्रायो निदर्शयति तत्प्रथमो रघूणां
तत्पादयोः प्रतिनिधी मणिपादुके वा ॥ २८.४॥ ८२४॥

चरण मनघ वृत्तेः कस्यचित्प्राप्य नित्यं
सकल भुवन गुप्त्यै सत्पथे वर्तते यः ।

नरपति बहुमानं पादुके वाधिगच्छन्
स भवति समयेषु प्रेक्षितज्ञै रुपास्यः ॥ २८.५॥ ८२५॥

रामे राज्यं पितुरभि मतं सम्मतं च प्रजानां
माता वव्रे तदहि भरते सत्यवादी ददौ च ।
चिन्तातीतः समजनि तदा पादुकाग्र्याभिषेको
दुर्विज्ञान स्वहृदयमहो दैवमत्र प्रमाणम् ॥ २८.६॥ ८२६॥

नातिक्रामे च्चरण वहनात्पादुका पादपीठं
यद्वाऽऽसन्नं परमिह सदा भाति राजासनस्य ।
पूर्वत्रैव प्रणिहित मभूद्धन्त रामेण राज्यं
शङ्के भर्तु र्बहुमति पदं विक्रमे साहचर्यम् ॥ २८.७॥ ८२७॥

प्रतिपद चपलाऽपि पादुका रघुपतिना स्वपदे निवेशिता ।
समजनि निभृत स्थिति स्तदा भवति गुणः श्रियमभ्युपेयुषाम्॥२८.८॥ ८२८॥

गतिहेतुरभूत् क्वचित्पदे स्थितिहेतु र्मणिपादुका क्वचित् ।
न हि वस्तुशु शक्ति निश्चयो नियतिः केवल मीश्वरेच्छया ॥ २८.९॥ ८२९॥

अधरीकृतोऽपि महता तमेव सेवेत सादरं भूष्णुः ।
अलभत समये रामात् पादाक्रान्ताऽपि पादुका राज्यम् ॥ २८.१०॥ ८३०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे सुभाषित पद्धति रष्टाविंशी ॥